# केरलपाठावलिः

# संस्कृतम्

## सप्तमी कक्ष्या

### द्वितीयो भागः

संस्कृतविद्यालयानां कृते

## KERALA READER - SANSKRIT

### Standard VII

### Part - II

For Sanskrit Schools only

Government of Kerala
Department of Education
2016

# राष्ट्रगीतम्

जनगण मन अधिनायक जय हे,
भारतभाग्यविधाता।
पंजाब सिंध गुजरात मराठा,
द्राविड़ उत्कल बंगा।
विंध्य हिमाचल यमुना गंगा,
उच्छलजलधितरंगा।
तव शुभ नामे जागे,
तव शुभ आशिष माँगे,
गाहे तव जय-गाथा।
जनगणमंगलदायक जय हे,
भारतभाग्यविधाता।
जय हे जय हे जय हे
जय जय जय जय हे।

# प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च।

अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च।

मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

*Prepared by:* State Council of Educational Research & Training (SCERT)
Poojappura, Thiruvananthapuram -12, Kerala. E-mail:scertkerala@gmail.com

First Edition : 2014, Reprint : 2016

*Type setting by:* SCERT Computer Lab.
*Printed at:* KBPS, Kakkanad, Kochi -30.

© Government of Kerala
Education Department
2016

# भूमिका।

आधुनिकविद्याभ्यासप्रक्रियासु नूतनाशयानां सन्निवेशः प्रकटो दृश्यते। शिशोः समग्रं विकासं (शारीरिकं, मानसिकं, बौद्धिकं) लक्ष्यीकृत्यैव एषामाशयानां प्रवृत्तिः प्रचलति। अत एव पाठ्यपुस्तकरचनायां विद्याशास्त्रिणः केरलराज्यशासकाश्च अवहिताः भवन्ति।

अधीतिः, बोधः, आचरणं, प्रचारणं चेति चतुर्धा विभक्ता विद्याभ्यासप्रक्रिया। एतत्फलप्राप्तये कालानुकूलं परिष्करणमपि आवश्यकम् अस्ति। शिशुमनःशास्त्रम् अनुसृत्यैव पाठ्यपुस्तकरचना कृता। तदर्थम् उपयोगिनी भवति परिष्कृता पाठ्यपद्धतिः। भारत देशीयपाठ्यपद्धतीः मूल्यनिर्णयोपाधींश्च उपजीव्यैव निर्मितमिदं पाठ्यपुस्तकम्।

प्रथमं पाठभागः, तदनु पठनप्रवर्तनानि, ततः अनुबन्धश्चेति क्रम एव सर्वेषु पाठेषु स्वीकृतः। कथापूरणं, गानालपनम्, अभिनयः इत्यादीनि शिशुकेन्द्रीकृतानि मानसिकविकासोल्लासप्रदानि पठनप्रवर्तनानि अत्र समायोजितानि विद्यन्ते। एवं च संस्कृतभाषां प्रति छात्रेषु आभिमुख्यं जनयितुं कथाः, गीतानि, सुभाषितादीनि च अत्र आयोजितानि सन्ति। सरलया रीत्या भाषाप्रयोगसामर्थ्यं सम्पादयितुम् अनेन छात्राः शक्ताः भवेयुः।

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषदः नेतृत्वे, अध्यापकानां, विद्याभ्यासविचक्षणानां च कठिनपरिश्रमस्य फलमेवेदं पाठ्यपुस्तकम्।

पठनोपकरणेष्वन्यतमम् एतत् पुस्तकं विद्यार्थिनां स्वयंपठनाय सहायकं भवति। नूतनमिदं पाठ्यपुस्तकं विद्याकुतुकिनां हस्तेषु समर्पयन्नहं नितरां निर्वृतिमनुभवामि।

पाठ्यपुस्तकमिदं लक्ष्यसाधकं कर्तुं भवदीयानामपि निर्देशान् सादरं प्रार्थये।

भवदीयः

**डा॰ पी.ए फत्तिमा**

अनन्तपुरी

निदेशकः

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलाः।

# TEXTBOOK DEVELOPMENT COMMITTEE

## SANSKRIT

## STD_VII (ORIENTAL)

**Participants**

- **Alice. O,** HSA Sanskrit, SVHSS Clappana, Kollam.
- **Ramakrishnan. K.B,** H.S.A., C.A. H.S.S., Peruvamba, Palakkad.
- **Ramani. K,** HSA, K.V.S.H.S.S. Muthukulam, Alappuzha.
- **Shaija. E.R,** H.S.A., St. Josephs HS, Chathedom, North Paravur, Ernakulam.

**Experts**

- **Dr. Muthulekshmi,** Asso. Prof., SSUS, Vanchiyur, Thiruvananthapuram.
- **Dr. Sahadevan. G,** Prof. (Rtd.) University College, Thiruvananthapuram.

**Advisor**

- **Prof.R.Vasudevan Potti,** Prof. (Rtd)
  Sivadhamam, Sreekandeswaram, Thiruvananthapuram

**Artists**

- **Vargheese Kalathil,** GHSS, Pallikkunnu, Kannur
- **Rajeevan Parayil,** H.S. Azhikkode, Kannur

**Academic Co - Ordinator**

- **Dr. Kerala Sreemathi. T,** Research Officer (Sanskrit), SCERT.

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद् - केरला:

STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING - KERALA

# विषयानुक्रमणिका


| | पाठस्य नाम | | व्यवहाररूपम् | पुटसंख्या |
|---|---|---|---|---|
| 1. | मिथिलाप्रवेशः | - | कथा | 6-12 |
| 2. | डो. पि.के. नारायणपिल्ला | - | जीवनचरितम् | 13-19 |
| 3. | दर्शनानि | - | उपन्यासः | 20-25 |
| 4. | अमरकोशः | - | कोशः | 26-30 |
| 5. | सुमेरुपर्वतः | - | काव्यम् | 31-47 |



१

# मिथिलाप्रवेशः

आदिकविना वाल्मीकिना विरचितं काव्यं भवति रामायणम्। वसिष्ठमहर्षेः उपदेशेन दशरथः यागरक्षार्थं रामलक्ष्मणौ विश्वामित्रेण साकं प्रेषयामास।

मार्गमध्ये विश्वामित्रः रामलक्ष्मणाभ्यां, क्षुत्पिपासाशमनार्थकौ 'बला - अतिबला'ख्यौ द्वौ मन्त्रौ उपादिशत्। ततः ते गङ्गाम् अतरन्। पश्चात् ताटकावनं प्रापुः। तदा विश्वामित्रः रामम् एवम् अवदत्। "राम! इदं वनं पश्य। अत्र कामरूपिणी, दुष्टचारिणी, अतिभयङ्करा ताटका वसति। तस्याः भीत्या कोऽपि अनेन मार्गेण न चलति। तस्याः वधः कार्यः" इति।

मुनेः वचनं श्रुत्वा रामः ज्याघोषमकरोत्। तेन शब्देन संक्रुद्धा विकृतानना तत्रागता ताटका रामलक्ष्मणौ भक्षयितुम् उद्युक्ता। तदा



रामबाणेनाहता सा घोररूपा भूमौ अपतत्। शापमुक्ता सा राक्षसी श्रीरामानुज्ञया देवलोकम् अगच्छत्। रात्रौ रामादयः काम्याश्रमे उषित्वा प्रातः सिद्धाश्रमम् अगच्छन्।

तत्र यागे समारब्धे मारीचः, सुबाहुः तस्यानुचराः च आगत्य आकाशात् रुधिरौघान् अवासृजन्। रामलक्ष्मणौ अस्त्रेण मारीचम् अर्णवे क्षिप्त्वा सुबाहुप्रमुखान् व्यापाद्य यज्ञम् अपालयताम्। ऋषिभिः पूजितः रघुनन्दनः लक्ष्मणविश्वामित्राभ्यां सह सिद्धाश्रमे अवसत्।

अनन्तरं सूर्यचन्द्रसमानौ तौ कुमारौ विश्वामित्रेण साकं महाराजस्य जनकस्य यागं, त्रैयम्बकं नाम शैवचापं च द्रष्टुं मिथिलां प्रति प्रस्थितौ। मार्गमध्ये रामः गौतमाश्रमे शापेन शिलारूपेण स्थितामहल्यां पादस्पर्शेन शापात् अमोचयत्।







## शब्दकोशः

| पदम् | संस्कृतम् | कैरली | कन्नटम् | आङ्गलम् |
|---|---|---|---|---|
| क्षुत् | बुभुक्षा | വിശപ്പ് | ಹಸಿವು | hunger |
| पिपासा | तृषा | ദാഹം | ಬಾಯಾರಿಕೆ | thirst |
| ज्या | मौर्वी | ഞാൺ | ಬಿಲ್ಲಿನದಾರ | bow string |
| पश्चात् | ततः | പിന്നീട് | ಅನಂತರ | after |
| अनुज्ञा | अनुमतिः | അനുവാദം | ಅನುಮತಿ | permission |
| उषित्वा | वासं कृत्वा | താമസിച്ചിട്ട് | ವಾಸಮಾಡಿ | being lived |
| प्रातः (अव्ययम्) | प्रभाते | രാവിലെ | ಬೆಳಿಗ್ಗೆ | morning |
| रुधिरम् | रक्तम् | രക്തം | ರಕ್ತವು | blood |
| व्यापाद्य | हत्वा | കൊന്നിട്ട് | ಕೊಂದು | being killed |
| बाणः | शरः | അമ്പ് | ಬಾಣ | arrow |
| धनुः | चापः | വില്ല് | ಬಿಲ್ಲು | bow |

## पदच्छेदः

इत्युक्त्वा - इति + उक्त्वा।

कोऽपि - कः + अपि।

रामबाणेनाहता - रामबाणेन + आहता।

## विग्रहः

क्षुत्पिपासे - क्षुत् च पिपासा च।

कामरूपिणी - कामं रूपं यस्याः सा।

दुष्टचारिणी - दुष्टं (कर्म) चरितुं शीलम् अस्याः अस्ति इति।

अतिभयङ्करी - भयं करोति इति भयङ्करी, अधिकतया भयङ्करी।

संक्रुद्धा - सम्यक् क्रुद्धा।

विकृतानना - विकृतम् आननं यस्याः सा।



घोररूपिणी - घोरं रूपं यस्याः सा।

शापमुक्ता - शापात् मुक्ता।

श्रीरामानुज्ञया - श्रीरामस्य अनुज्ञा श्रीरामानुज्ञा, तया।

महाराजः - महान् च असौ राजा च।

## व्याकरणकार्याणि

विश्वामित्रेण साकम् - सहार्थक साकं शब्दयोगे विश्वामित्रेण इति तृतीया विभक्तिः।

तस्याः भीत्या - भीत्रार्थानां भयहेतुः इति नियमेन तस्याः इति पञ्चमी विभक्तिः।

यागे समारब्धे - यदा यागः समारब्धः तदा (सतिसप्तमी)

मिथिलां प्रति - अभितःपरितःसमया निकषाहऽप्रतियोगेऽपि इति प्रमाणेन मिथिलाम् इति द्वितीया।

## क्रियापदानि

चलति - चल् चलने परस्मैपदी लट् प्र. पु. ए. व.।

सन्ति - अस भुवि परस्मैपदी लट् प्र. पु. ब. व.।

अकरोत् - डुकृञ् करणे परस्मैपदी लङ् प्र. पु. ए. व.।

उपादिशत् - उप + दिश् अतिसर्जने (उपदेशे) परस्मैपदी लङ् प्र. पु. ए. व.।

अतरन् - तॄ प्लवनतरणयोः परस्मैपदी लङ् प्र. पु. ब. व.।

अवदत् - वद व्यक्तायां वाचि परस्मैपदी लङ् प्र. पु. ए. व.।

अपतत् - पत्लृ गतौ परस्मैपदी लङ् प्र. पु. ए. व.।

अगच्छन् - गम्लृ गतौ परस्मैपदी लङ् प्र. पु. ब. व.।

अवासृजन् - अव + सृज् अतिसर्जने परस्मैपदी लङ् प्र. पु. ब. व.।

अपालयताम् - पा पालने (रक्षणे) परस्मैपदी लङ् प्र. पु. द्वि. व.।

अवसत् - वस निवासे परस्मैपदी लङ् प्र. पु. ए. व.।

## पठनप्रवर्तनानि।

❖ कथां सम्यक् पठित्वा यावच्छक्यं प्रश्नान् लिखतु। प्रश्नोत्तरकेलिं प्रचालयतु।

**श्रद्धेयाः अंशाः।**

- आशयावगतिः।

- प्रश्नवाचकानां यथोचितः प्रयोगः।
- वाक्यघटनाज्ञानम्।

❖ पाठभागं सम्यक् पठित्वा भूतकालक्रियापदानि (लङ्) चित्वा लिखतु।

**श्रद्धेयाः अंशाः।**

- आशयावगमनम्।
- कालबोधः।
- क्रियायाः घटना।

❖ पाठभागस्थानि अव्ययपदानि चित्वा पट्टिकां करोतु।

| क्त्वान्तम् | तुमुन्नन्तम् | ल्यबन्तम् |
|---|---|---|
| | | |
| | | |

**श्रद्धेयाः अंशाः।**

- अर्थग्रहणम्।
- अव्ययज्ञानम्।
- पदबोधः।

❖ कथास्तम्भान् क्रमीकरोतु।

मिथिलां प्रति प्रस्थितौ।

रुधिरौघान् अवासृजन्।

यागे समारब्धे राक्षसाः आगताः।

ताटकाम् अवधीत्।

संक्रुद्धा ताटका रामलक्ष्मणौ भक्षयितुम् उद्युक्ता।

राक्षसवधम् अकरोत्।

ताटकावनं प्रविवेश।

एकदा रामलक्ष्मणौ विश्वामित्रेण साकं गतौ।

**श्रद्धेयाः अंशाः।**

- आशयावगमः।
- घटनायाः ज्ञानम्।
- उचितरीत्या क्रमीकरणम्।
- आशयपूरणम्।

## अनुबन्धः

### शब्दरूपाणि

**इकारान्तः पुल्लिङ्गः 'मुनि' शब्दः।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. | मुनिः | मुनी | मुनयः |
| सं. प्र. | हे मुने | हे मुनी | हे मुनयः |
| द्वि. | मुनिम् | मुनी | मुनीन् |
| तृ. | मुनिना | मुनिभ्यां | मुनिभिः |
| च. | मुनये | मुनिभ्यां | मुनिभ्यः |
| प. | मुनेः | मुनिभ्यां | मुनिभ्यः |
| ष. | मुनेः | मुन्योः | मुनीनाम् |
| स. | मुनौ | मुन्योः | मुनीषु। |

**दकारान्तः पुल्लिङ्गः 'तद्' शब्दः।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. | सः | तौ | ते |
| द्वि. | तम् | तौ | तान् |
| तृ. | तेन | ताभ्यां | तैः |
| च. | तस्मै | ताभ्यां | तेभ्यः |
| प. | तस्मात् | ताभ्यां | तेभ्यः |
| ष. | तस्य | तयोः | तेषाम् |
| स. | तस्मिन् | तयोः | तेषु। |

## धातुरूपाणि

**वद व्यक्तायां वाचि परस्मैपदी लङ्।**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्र. पु. | अवदत् | अवदताम् | अवदन् |
| म. पु. | अवदः | अवदतम् | अवदत |
| उ. पु. | अवदम् | अवदाव | अवदाम। |

## अमरकोशः

याग: - यज्ञः सवोध्वरो यागः सप्तन्तुर्मखः क्रतुः।

रुधिरम् - रुधिरेऽसृग्लोहितास्त्ररक्तक्षतजशोणितम्।

मुखम् - वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्।

चापः - धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम्।

ज्या - मौर्वी ज्या शिञ्जिनी गुणः।

## किमधिगतम्।

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| **क्रम संख्या** | **प्रवर्तनानि** | **सम्यक् कृतम्** | **भागिकतया कृतम्** | **क्लेशनिर्देशः** | **परिहारबोधनम् संख्यया सूच्यताम्*** |
|---|---|---|---|---|---|
| 1. | प्रश्नोत्तरकेलिः सञ्चालिता। | | | | |
| 2. | क्रियारूपाणां चयनं कृतम्। | | | | |
| 3. | अव्ययपदचयनं कृतम्। | | | | |
| 4. | कथास्तम्भाः क्रमीकृताः। | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*

२

# डो. पि.के. नारायणपिल्ला



केरलीयसंस्कृतज्ञेषु अन्यतमः आसीत् डो. पि.के. नारायणपिल्लामहोदयः। सः पत्तनंतिट्टजिल्लायां तिरुवल्लाग्रामे दशोत्तरनवशताधिकसहस्रतमे (१९१०)क्रिस्तुवर्षे दिसंबर्मासस्य पञ्चविंशे दिने जनिमलभत। लक्ष्मियम्मा, पालियक्करगोदवर्मा च तस्य पितरौ। सः चत्वारिंशदुत्तरनवशताधिकसहस्रतमे वर्षे (१९४०) श्रीमतीं कमलाम्बां पर्यणयत्।

प्राथमिकविद्याभ्यासानन्तरं पञ्चत्रिंशदुत्तरनवशताधिकसहस्रतमे (१९३५)वर्षे मद्रपुरीं (चेन्नै) गत्वा मद्रास् सर्वकलाशालातः बि.ए. बिरुदम् अवाप्य ततः एव संस्कृतकैरलीभाषयोः एम्.ए. बिरुदम् अपि अलभत। सः मुम्बई सर्वकलाशालायाः डोक्ट्रेट् बिरुदं (विद्यावारिधिं) सम्पादितवान्। पण्डितश्रेष्ठोऽयं केरलदेशं प्रत्यागत्य शिक्षामण्डले निमग्नोऽभूत्। सप्तवर्षाणि यावद् अनन्तपुर्यां संस्कृतकलाशालायां प्राचार्यपदमावहत्।

कर्मनिरतोऽयं महोदयः बहुषु सामाजिकसांस्कृतिकमण्डलेषु युगपत् विराजते स्म। अनन्तपुर्याः सांस्कारिकविकसनसमितेः, हिन्दीप्रचारसभायाः च अध्यक्षपदम् अलञ्चकार उल्लूर्स्मारकग्रन्थालयस्य स्थापकोऽयं कैरलीभाषामण्डले च महद्योगदानं कृतवान् आसीत्। अय्यिप्पिल्लाशान्महोदयस्य रामकथापाट्ट नामकः पुरातनमलयालभाषाग्रन्थः अनेन एव आदौ संगृह्य सटिप्पणं प्रकाशितः। संस्कृतमलयालाङ्गलेयभाषासु उज्ज्वलप्रभावः एषः अनेकेषां ग्रन्थानामपि रचयिता। तस्य ग्रन्थेषु विश्वभानुः, धर्मसागरः, चिदात्मस्तवम्, इत्यादयः प्रसिद्धाः सन्ति। कैरलीतः अनूदितेषु ग्रन्थेषु प्रसिद्धो भवति मयूरदूतम्। तिसृषु भाषासु अपि तेन अनेके ग्रन्थाः संशोधिताः। केरलसर्वकारैः सः संस्कृतसर्वकलाशालायाः स्थापनार्थम् एकाङ्गसमितित्वेन नियुक्तः च। केरलसर्वकलाशालायां प्रथमतया समारब्धे कैरलीविभागे अयमेव प्रथमाध्यक्षपदवीम् अलङ्कृतवान्।

बहुभिः पुरस्कारैः समादृतोऽयं भाषापण्डितः द्व्यशीत्युत्तरैकोनविंशतिशतमे (१९८२) वर्षे केन्द्रसाहित्य-अक्कादमिद्वारा संस्कृतदेशीयपुरस्कारेण सम्मानितः। पण्डितरत्नं - साहित्यकलानिधिः - विवेकानन्द अवार्ड् इत्यादिभिः पुरस्कारैः विभूषितः च। सर्वादरणीयः केरलीयोऽयं महात्मा नवत्युत्तरैकोनविंशतिशतमे (१९९०) वर्षे मार्च्मासस्य तृतीये दिने दिवंगतः।

**"जीवन्तं मृतवन्मन्ये देहिनं धर्मवर्जितम्।**
**मृतो धर्मेण संयुक्तो दीर्घजीवी न संशयः।।'**

सारः

धर्मेण रहितः पुरुषः मृततुल्यो भवति। किन्तु धर्मचारी मरणानन्तरमपि यशसा जीवति इति चाणक्यमतम्।

## शब्दकोशः

| पदम् | संस्कृतम् | कैरली | कन्नटम् | आङ्गलम् |
|---|---|---|---|---|
| संस्कृतज्ञः | संस्कृतपण्डितः | സംസ്കൃതപണ്ഡിതൻ | ಸಂಸ್ಕೃತಪಂಡಿತನು | Sanskrit scholar |
| अन्यतमः | अनेकेष्वेकः | അനേകരിൽ ഒരാൾ | ಅನೇಕರಲ್ಲಿ ಒಬ್ಬ | one of several |
| अवाप्य | संप्राप्य | പ്രാപിച്ചിട്ട് | ಹೊಂದಿ | having obtained |
| निमग्नः | निलीनः | നിമഗ്നൻ | ತಲ್ಲೀನನು | immersed |
| प्राचार्यः | प्राध्यापकः | പ്രിൻസിപ്പാൾ | ಪ್ರಾಚಾರ್ಯ | Principal |
| युगपत् | एकदैव | ഒരുമിച്ച് | ಏಕಕಾಲದಲ್ಲಿ | together |
| अलञ्चकार | समलंकरोति स्म | അലങ്കരിച്ചു | ಅಲಂಕರಿಸಿದನು | adroned |
| आङ्गलेयभाषा | आङ्गलभाषा | ഇംഗ്ലീഷ് | ಆಂಗ್ಲಭಾಷೆ | English |
| उज्वलप्रभाववान् | अतिप्रतिभावान् | അതിപ്രതിഭാശാലി | ಅತಿಪ್ರತಿಭಾವಂತ | eminent scholar |
| अनेकेषाम् | बहूनाम् | അനേകരുടെ | ಅನೇಕರ | so many |

| | | | | |
|---|---|---|---|---|
| रचयिता | कर्ता | രചയിതാവ് | ರಚಿಸಿದವನು | author |
| भाषानुवादः | भाषाविवर्तनम् | തർജ്ജമ | ಅನುವಾದ | translation |
| संशोधितः | सम्यक्परिशोधितः | നല്ലതുപോലെ പരിശോധിച്ചത് | ಸರಿಯಾಗಿಪರಿಶೋಧಿಸಿದ | edited |
| बहुभिः | अनेकैः | അനേകരാൽ | ಬಹಳ | much |
| बहुमतः | बहुमानितः | ബഹുമാനിക്കപ്പെട്ടവൻ ആദരണീയൻ | ಆದರಣೀಯ | respected |
| सर्वकारः | शासकः | സർക്കാർ | ಸರಕಾರ | government |
| दिवंगतः | मृतः | സ്വർഗം പ്രാപിച്ചു | ದಿವಂಗತ | died |
| देहिनाम् | शरीरिणाम् | ദേഹികൾക്ക് | ಜೀವಿಗಳ | embodied |
| धर्मवर्जितम् | धर्मरहितम् | ധർമത്തിൽനിന്ന് വ്യതിരിക്തമായത് | ಧರ್ಮವಿರುದ್ಧವಾದ | violation of dharma |
| दीर्घजीवी | यशस्वी | യശസ്സോടുകൂടിയവൻ | ಯಶಸ್ವೀ | reputed |

## पदच्छेदः

निमग्नोऽभूत् - निमग्नः + अभूत्।

महद्योगदानम् - महत् + योगदानम्।

समादृतोऽयम् - समादृतः + अयम्।

## विग्रहः

संस्कृतज्ञेषु - संस्कृतं जानाति इति संस्कृतज्ञः, तेषु।

पितरौ - माता च पिता च।

कर्मनिरताः - कर्मसु निरताः।

प्रभाववान् - प्रभावः अस्य अस्ति इति।

सर्वादरणीयः - सर्वैः आदरणीयः।

धर्मवर्जितम् - धर्मेण वर्जितम्।

## अव्ययानि

गत्वा - गम् + क्त्वा (क्त्वान्तमव्ययम्)।

अवाप्य - अव + आप् + ल्यप् (ल्यबन्तम्)।

प्रत्यागत्य - प्रति + आङ् + गम् + ल्यप् (ल्यबन्तम्)।

## वाक्ये प्रयोगः

यावत् - तावत् - यावत् अन्नं मात्रा दत्तं तावत् भुक्तम्।

## पठनप्रवर्तनानि।

❖ वर्षाणां संख्याम् उदाहृतानुसारम् अक्षरैः लिखतु।

| | | |
|---|---|---|
| 1910 | १९१० | दशोत्तरनवशताधिकसहस्रम्। |
| 1952 | १९५२ | .....................................। |
| 1960 | १९६० | .....................................। |
| 2000 | २००० | .....................................। |
| 2009 | २००९ | .....................................। |

**श्रद्धेयाः अंशाः।**

- चर्चा।
- संख्यानां स्थानज्ञानम्।
- अक्षरेण लेखनज्ञानम्।

❖ उदाहरणानुसारं पाठभागाद् अव्ययपदानि चित्वा वाक्ये योजयतु।

उदा - अहं संस्कृतभाषायाम् एव सम्भाषणं करोमि।

**श्रद्धेयाः अंशाः।**

- पाठभागस्य वाचनम्।
- अव्ययपदचयनम्।
- आशयावगमनम्।

❖ विवेकानन्द-शङ्कराचार्य - श्रीरामकृष्णपरमहंसानां जीवनचरितं लिखित्वा सङ्घशः अवतारयतु।

कालः

जन्मदेशः

पितरौ

योग्यताः

योगदानम्

स्वर्गप्राप्तिः।

**श्रद्धेयाः अंशाः।**

- चर्चा।
- वाक्यघटना।
- अवतारणम्।

❖ नारायणपिल्लामहोदयस्य जीवनचक्रे संस्कृतस्य योगदानमधिकृत्य लघुटिप्पणिं लिखतु।

**श्रद्धेयाः अंशाः।**

- चर्चा।
- आशयचयनम्।
- वाक्यरचना।

## अनुबन्धः

### शब्दरूपाणि

**नकारान्तः पुल्लिङ्गः 'देहिन्' शब्दः (हलन्तम्)।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. | देही | देहिनौ | देहिनः |
| सं. प्र. | हे देहिन् | हे देहिनौ | हे देहिनः |
| द्वि. | देहिनं | देहिनौ | देहिनः |
| तृ. | देहिना | देहिभ्याम् | देहिभिः |
| च. | देहिने | देहिभ्याम् | देहिभ्यः |
| प. | देहिनः | देहिभ्याम् | देहिभ्यः |
| ष. | देहिनः | देहिनोः | देहिनाम् |
| स. | देहिनि | देहिनोः | देहिषु। |

## धातुरूपाणि

❖ अलभत - लभ् धातु आत्मनेपदी लङ्. प्र. पु. ए. व.।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु. | अलभत | अलभेताम् | अलभन्त। |
| म.पु. | अलभथाः | अलभेथाम् | अलभध्वम्। |
| म.पु. | अलभे | अलभावहि | अलभामहि। |

❖ पर्यणयत् - परि णीञ् लङ् परस्मैपदी प्र. पु. ए. व.।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु. | पर्यणयत् | पर्यणयताम् | पर्यणयन् |
| म.पु. | पर्यणयः | पर्यणयतम् | पर्यणयत |
| उ.पु. | पर्यणयम् | पर्यणयाव | पर्यणयाम। |

❖ आवहत् आङ् + वह्..............................। पूरयत।

प्र.पु. ................ ................ ................

म.पु. ................ ................ ................

म.पु. ................ .............. ................

❖ विराजते स्म वि + राज् आत्मनेदी लट्. प्र. पु. ए. व.।

राजते राजेते राजन्ते।

❖ **“लट् स्मे” इति सूत्रेण स्म इत्यस्य योगे लट् भूतकालार्थं लभते।**

### अमरकोशः

भाषा - ब्राह्मी तु भारती भाषा गीः वाक् वाणी सरस्वती।

ज्ञः - धीरो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः।

## किमधिगतम् ?

❖ पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् संख्यया सूच्यताम्* |
|---|---|---|---|---|---|
| 1. | संख्या लिखिता। | | | | |
| 2. | अव्ययपदानि चित्वा वाक्ये योजितानि। | | | | |
| 3. | जीवनचरितं निर्देशनुसारं लिखितम्। | | | | |
| 4. | नारायणपिल्ला-महोदयस्य संस्कृते योगदानमधिकृत्य टिप्पणी रचिता। | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*

## ३

# दर्शनानि

प्रपञ्चस्य याथार्थ्यप्रतिपादकं शास्त्रमेव दर्शनम्। दृश्यते साक्षात्क्रियते अनेन प्रपञ्चोत्पत्तिस्थितिलयादिकम् इति दर्शनम्। भारतीयरीत्या दर्शनानि द्विधा विभक्तानि। आस्तिकानि (वैदिकानि) नास्तिकानि (अवैदिकानि) चेति। यानि वेदप्रामाण्यम् अभ्युपगच्छन्ति तानि आस्तिकानि। इतराणि नास्तिकानि। आस्तिकानि तु सांख्यं, योगः, वैशेषिकम्, न्यायः पूर्वमीमांसा, उत्तरमीमांसा चेति षट्।

### सांख्यम्

भौतिकसत्ता एव प्रपञ्चस्य मूलकारणमिति उद्घोषयति सांख्यदर्शनम्। सांख्यम् इत्यस्य ज्ञानम् इत्यर्थः। सांख्यं सृष्टिरहस्यं विवृणोति। कपिलमुनिरेव सांख्यस्य प्रवर्तकः। तत्र जीवः पुरुषशब्देन व्यवह्रियते। स च अनेकः। सांख्यं सत्कार्यवादम् अङ्गीकरोति। तच्च निरीश्वरसांख्यम्।

### योगदर्शनम्

'युजिर् योगे' इति धातोः योगपदस्य निष्पत्तिः। योगः चित्तवृत्तिनिरोधः। पतञ्जलिमहर्षेः योगसूत्राण्येव योगदर्शनस्य आधारः। तद्दर्शनं सेश्वरसांख्यम् इत्यपि उच्यते। ईश्वरश्च पुरुषविशेषः।

### वैशेषिकदर्शनम्

अणुसिद्धान्तस्थापकं युक्त्यधिष्ठितं दर्शनं भवति वैशेषिकदर्शनम्। अस्मिन् दर्शने विशेषाख्यपदार्थस्य प्राधान्यम् अधिकतया अस्ति। अतः तत् वैशेषिकम् इत्युच्यते। कणादः अस्य दर्शनस्य प्रवर्तकः।

### न्यायदर्शनम्

प्रमाणैः अर्थपरीक्षणं न्यायः। गौतमः एव अस्य प्रवर्तकः। न्यायदर्शनं कार्यकारणसिद्धान्तं मुख्यतया अङ्गीकरोति। तत्र प्रमाणप्रमेयादयः षोडशपदार्थाः अङ्गीक्रियन्ते।

## पूर्वमीमांसा

मीमांसा इत्यस्य जिज्ञासा इत्यर्थः। वेदस्य पूर्वभागे कर्मप्रतिपादकविषये जिज्ञासा। जैमिनिमहर्षिः एवास्य प्रवर्तकः। तत्र द्वादशैःअध्यायैः दर्शनमिदं विभक्तम्। जीवः आत्मा नित्यः परलोकगामी इति तैरभिमतः।

## उत्तरमीमांसा (वेदान्तः)

ज्ञानार्थप्रधाना भवति उत्तरमीमांसा। तत्र ब्रह्मजिज्ञासा प्रस्तूयते। वेदान्तदर्शनमिति अस्य नामान्तरमस्ति। वेदानाम् अन्तिमावयवाः भवन्ति उपनिषदः। भारतीयचिन्तायाम् अत्युन्नतं स्थानमलङ्करोति वेदान्तः। बादरायणः एवास्य प्रवर्तकः। वेदान्ते द्वैत - अद्वैत - विशिष्टाद्वैतरूपेण त्रिविधाः वादाः प्रचलन्ति। अद्वैतवेदान्तः वेदान्तदर्शनस्य मुख्यविभागः। बादरायणकृतं ब्रह्मसूत्रं चतुरध्यायी शब्देन व्यवह्रियते।

अवैदिकानि नास्तिकदर्शनानि मुख्यतया त्रिधा। तानि तु - चार्वाकदर्शनं, बौद्धदर्शनं, जैनदर्शनं चेति।

**चार्वाकदर्शनम्** - अवैदिकेषु दर्शनेषु प्राचीनतमं भवति चार्वाकदर्शनम्। बृहस्पतिः अस्य उपज्ञाता। भौतिकाभिवृद्धिरेव उत्कर्षस्य कारणमिति इदं दर्शनं सूचयति।

"यावज्जीवं सुखं जीवेत् ऋणं कृत्वा घृतं पिबेत्।

भस्मीभूतस्य देहस्य पुनरागमनं कुतः" इति तेषाम् उद्घोषः।

जीवनकाले सदा सुखमस्तु ऋणं कृत्वापि घृतं पिबतु इति तेषां विश्वासः।

**बौद्धदर्शनम्** - तृष्णा एव सर्वदुःखानां कारणमिति बौद्धानां मतम्। अहिंसासिद्धान्ते अधिष्ठितस्य अस्य सिद्धान्तस्य प्रवर्तकः गौतमबुद्धः भवति। दुःखमस्ति, दुःखकारणमस्ति, दुःखनिरोधः अस्ति तदुपायोऽप्यस्ति इति चत्वारि आर्यसत्यानि।

**जैनदर्शनम्** - प्रपञ्चे वर्तमानानां हिंसादिकर्मणां निराकरणाय जैनाः प्रवृत्ताः। कामक्रोधलोभमोहमदमात्सर्यादिभ्यो लौकिकबन्धेभ्यो मुक्तः एव जिनः। चतुर्विंशति तीर्थङ्करेषु अन्तिमः वर्धमानमहावीरः अस्य प्रसारकः।

## शब्दकोशः

| | | | | |
|---|---|---|---|---|
| दर्शनम् | तत्त्वशास्त्रम् | തത്ത്വശാസ്ത്രം | ತತ್ವ ಶಾಸ್ತ್ರ | Philosophy |
| उपज्ञा | आदिज्ञानम् | ആദ്യജ്ഞാനം | ಆದಿಜ್ಞಾನ | first knowledge |
| उपज्ञाता | आदिदर्शकः | ആദ്യമായി ആവിഷ്കരിച്ച വ്യക്തി | ಮೊದಲು ಗುರುತಿಸಿದವನು | profounder |
| प्रवर्तकः | समाहर्ता | കൂട്ടിയോജിപ്പിച്ചവൻ | ಪ್ರವರ್ತಕನು | compiler |
| उत्कर्षः | समुन्नतिः | ഉയർച്ച | ಮೇಲ್ಮೆ | uprising |
| मुख्यतया | प्रधानतया | പ്രധാനമായിട്ട് | ಪ್ರಧಾನವಾಗಿ | prominently |
| प्रामाण्यम् | प्रमाणैरङ्गीकृतम् | പ്രമാണങ്ങളാൽ അംഗീകരിക്കപ്പെട്ടത് | ಪ್ರಮಾಣಗಳಿಂದ ಅಂಗೀಕರಿಸಿದ | authenticity |
| निराकरणाय | दूरीकरणाय | ദൂരീകരിക്കുന്നതിന് | ನಿರಾಕರಿಸಲು | to avoid |
| तृष्णा | अत्याग्रहः | അത്യാഗ്രഹം | ಅತ್ಯಾಸೆ | greed |
| मुक्तः | मोचितः | മുക്തൻ | ಸ್ವತಂತ್ರನು | liberated |
| सत्कार्यवादः | कारणे पूर्वमेव कार्यम् आसीत् इति वादः | കാരണത്തിൽ ആദ്യമെതന്നെ കാര്യം ഉണ്ടായിരുന്നു | ಸತ್ಕಾರ್ಯವಾದ | in casue effect was existed earlier |

## पदच्छेदः

विज्ञानरूपोऽसौ - विज्ञानरूपः + असौ।

इत्यपि - इति + अपि।

तद्दर्शनं - तत् + दर्शनम्।

तदुपायोऽप्यस्ति - तदुपायः + अपि + अस्ति।

चेति - च + इति।

योगसूत्राण्येव - योगसूत्राणि + एव।

कपिलमुनिरेव - कपिलमुनिः + एव।

| | | |
|---|---|---|
| अत्युन्नतम् | - | अति + उन्नतम्। |
| एवास्य | - | एव + अस्य। |
| तैरभिमतः | - | तैः + अभिमतः। |

## विग्रहः

| | | |
|---|---|---|
| दर्शनम् | - | दृश्यते (ज्ञायते) अनेन इति दर्शनम्। |
| आस्तिकाः | - | अस्ति वेदप्रामाण्यं येषां ते। |
| नास्तिकाः | - | नास्ति वेदप्रामाण्यं येषां ते। |
| अवैदिकानि | - | वेदस्य इदं वैदिकम्। न वैदिकम् अवैदिकम्। तानि अवैदिकानि। |
| युक्त्यधिष्ठितम् | - | युक्तौ अधिष्ठितम्। |
| सृष्टिरहस्यम् | - | सृष्टेः रहस्यम्। |
| नामान्तरम् | - | अन्यत् नाम । |
| जिज्ञासा | - | ज्ञातुम् इच्छा । |
| चित्तवृत्तिनिरोधः | - | चित्तस्य वृत्तिः चित्तवृत्तिः, तस्य निरोधः । |
| महर्षिः | - | महान् च असौ ऋषिः च। |
| लौकिकम् | - | लोके भवः लौकिकः, तं लौकिकम्। |
| प्राचीनतमम् | - | अत्यन्तं प्राचीनम्। |

## पठनप्रवर्तनानि।

❖ पाठं सम्यक् पठित्वा लट् रूपाणि चित्वा लिखतु।

**श्रद्धेयाः अंशाः।**

- पाठभागस्य वाचनम्।
- क्रियापदानां चयनम्।
- निर्दिष्टलकाररूपाणां विवेचनम्।

❖ अव्ययपदानि चित्वा वाक्ये योजयतु।

**श्रद्धेयाः अंशाः।**

- अर्थग्रहणम्।
- अव्ययस्वरूपज्ञानम्।

- पदबोधः।
- वाक्यघटना।

❖ उपन्यासं पठित्वा दर्शनानि, तेषाम् उपज्ञातृन् च अधिकृत्य पट्टिकां करोतु।

**श्रद्धेयाः अंशाः।**

- उपन्यासपठनम्।
- विवेचनम्।
- पट्टिकाकरणम्।

❖ उपन्यासं पठित्वा आस्तिकनास्तिकदर्शनानि अधिकृत्य लघूपन्यासं लिखतु।

**श्रद्धेयाः अंशाः।**

- आशयावगमनम्।
- विविच्य ज्ञानम्।
- पट्टिकाकरणम्।

## अनुबन्धः

### धातुपरिचयः

**पा पाने परस्मैपदी लोट्।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. पु. | पिबतु/पिबतात् | पिबताम् | पिबन्तु |
| म. पु. | पिब/पिबतात् | पिबतम् | पिबत। |
| उ. पु. | पिबानि | पिबाव | पिबाम। |

**उकारान्तः पुल्लिङ्गः 'गुरु' शब्दः।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. | गुरुः | गुरू | गुरवः |
| सं. प्र. | हे गुरो | हे गुरू | हे गुरवः |
| द्वि. | गुरुम् | गुरू | गुरून् |
| तृ. | गुरुणा | गुरुभ्याम् | गुरुभिः |

| | | | |
|---|---|---|---|
| च. | गुरवे | गुरुभ्याम् | गुरुभ्यः |
| प. | गुरोः | गुरुभ्याम् | गुरुभ्यः |
| ष. | गुरोः | गुर्वोः | गुरूणाम् |
| स. | गुरौ | गुर्वोः | गुरुषु। |

एवं सूनु, तरु, भानु शब्दाः।

## किमधिगतम् ?

**निर्देशः पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् संख्यया सूच्यताम्* |
|---|---|---|---|---|---|
| 1. | लट् रूपाणि विविच्य लिखितानि। | | | | |
| 2. | अव्ययं चित्वा वाक्ये योजितम्। | | | | |
| 3. | पट्टिका कृता। | | | | |
| 4. | लघूपन्यासः लिखितः। | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*

# ४

# अमरकोशः

पदानां पर्यायपदानि विविधानर्थान् च प्रकाशयन् अतिविस्तृतः एकः ग्रन्थतल्लजः अस्ति। सः ग्रन्थः भवति अमरसिंहस्य अमरकोशः। न केवलम् अर्थं किन्तु लिङ्गव्यवस्थां च अस्मिन् ग्रन्थे सूचयति। नामलिङ्गानुशासनाख्यः अयं समुद्र इव अगाधो भवति। प्रकृते पाठभागे केवलं षण्णां पदानामेव पर्यायपदानि वर्तन्ते।

**वनवर्गः** - **अटव्यरण्यं विपिनं गहनं काननं वनम्।**

**महारण्यमरण्यानी**

अटवी - ईकारान्तः स्त्री। अरण्यं, विपिनं, गहनं, काननं, वनं अकारान्तः नपुंसकलिङ्गः। षडपि काननस्य नामानि।

महारण्यम् - (अ. नपुम्), अरण्यानी (ई, स्त्री), द्वे अपि महतो वनस्य।



**मृगवर्गः -** **सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः।**
**कण्ठीरवो मृगरिपुर्मृगदृष्टिर्मृगाशनः।।**



सिंहः, मृगेन्द्रः, पञ्चास्यः, हर्यक्षः, कण्ठीरवः, मृगाशनः (अः पु.)।

केसरी - (नकारान्तः पुल्लिङ्गः)। हरिः, मृगदृष्टिः - (इ. पु.)।

मृगरिपुः - ( उ. पु.)। मृगद्विट् - (ष. पु.)। एतानि एकादश सिंहस्य पर्यायपदानि।

**व्याघ्रः** **शार्दूलद्विपीनौ व्याघ्रे।**



शार्दूलः , व्याघ्रः -( अ. पु.)। द्विपी - ( न. पु.)

एतानि त्रीणि शार्दूलस्य पर्यायपदानि।

**वनवर्गः -** **स्त्रियांसुमनसः पुष्पं प्रसूनं कुसुमं सुमम्।**

सुमनसः - (स. स्त्री. ब)। पुष्पवाचकः सुमनस्‌शब्दः बहुवचनान्तः। पुष्पं, प्रसूनं कुसुमं, सुमं - (अ. नपुं.)। एतानि पञ्च कुसुमस्य पर्यायपदानि।







**क्षत्रियवर्गः** **दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः।**

**मतङ्गजो गजो नागः कुञ्जरो वारणः करी।।**



दन्ती हस्ती, करी -( न. पु.)। दन्तावलः, द्विरदः, अनेकपः, द्विपः, मतङ्गजः, गजः, नागः कुञ्जरः वारणः (अ. पु.)। एतानि द्वादश गजस्य पर्यायपदानि।

**सप्तर्षीणां नामानि -**

मरीचिरंगिरा अत्रिःपुलस्त्यः पुलहः क्रतुः।
वसिष्ठश्चेति सप्तैते ज्ञेयाः मानसाः स्मृताः।।

मरीचिः, अंगिराः, अत्रिः, वसिष्ठः, पुलहः,
क्रतुः पुलस्त्यः एते सप्तर्षयः।



## पठनप्रवर्तनानि।

❖. अमरकोशपङ्क्तीनां पारायणं करोतु।

**श्रद्धेयाः अंशाः।**

- स्पष्टोच्चारणम्।
- उचितस्थाने पदविच्छेदः।
- अर्थावगतिः।

❖. पङ्क्तिषु विद्यमानानां पदानां विवेचनं करोतु।

**श्रद्धेयाः अंशाः।**

- सुव्यक्तं वाचनम्।
- पारायणम्।
- अर्थावगतिः।
- पर्यायपदानां ग्रहणम्।

❖ कक्ष्यायां पदकेलिं चालयतु।

**श्रद्धेयाः अंशाः।**

- प्रश्नोत्तराणां निर्धारणं
- केलीचालनम्।
- आशयावगमनम्।

❖ सङ्घे स्थित्वा पदपूरण- अक्षर पूरणस्पर्धां चालयतु

**श्रद्धेयाः अंशाः ।**

- पदबोधः।
- पर्यायपदग्रहणम्।
- अक्षरैः पूरणम्।

❖ पट्टिकां पठित्वा कोष्ठकाद् अक्षराणि स्वीकृत्य पर्यायपदानि निर्माय पूरयतु।

| करी | पुष्पं | शार्दूलः | सिंहः | काननं |
|---|---|---|---|---|
| ……… | ……… | ……… | ……… | ……… |
| ……… | ……… | ……… | ……… | ……… |
| ……… | ……… | ……… | ……… | ……… |

| | | | | | |
|---|---|---|---|---|---|
| द | ग | प्र | सु | मृ | |
| मं | व्या | वी | द | के | न |
| नं | नः | का | री | ज | |
| अ | सू | न्द्रः | ट | गे | मृ |
| स | नं | गा | न्ती | घ्रः | |

❖ उचितम् अक्षरम् उपयुज्य पूरयतु।

वार………..।

व………..ष्टः।

सु………..नसः।

क………..र वः।

अ………..वी।

❖ विजातीयं पदं निर्धार्य लिखतु।

| | | | | |
|---|---|---|---|---|
| केसरी | द्वीपी | सुमनसः | करोति | पुण्डरीकः। |
| चित्रकायः | गहनं, | विपिनं | पञ्चनखः | अपिबत्। |
| गच्छति | काननं | पुलहः | अंगीराः | सिंहः। |

❖ पर्यायपदानि लिखतु।

सिंहः, गजः।

## किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् संख्यया सूच्यताम्* |
|---|---|---|---|---|---|
| 1. | अमरकोशपङ्क्तीनां पारायणं कृतम्। | | | | |
| 2. | अमरकोशविवेचनम् कृतम्। | | | | |
| 3. | कक्ष्यायां पदकेली चालिता। | | | | |
| 4. | पदपूरण - अक्षरपूरण - स्पर्धा चालिता | | | | |
| 5. | पर्यायपदानि पूरितानि। | | | | |
| 6. | उचितम् अक्षरम् उपयुज्य पूरितम् | | | | |
| 7. | विजातीयं पदं निर्धार्य लिखितम् | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*



५

# सुमेरुपर्वतः

संस्कृतसाहित्ये समादरणीयं स्थानमलङ्करोति सुकुमारविरचितं श्रीकृष्णविलासाख्यं महाकाव्यम्। काव्यस्यास्य कथावस्तु श्रीमद्भागवतस्य दशमस्कन्धात् उद्धृतम्। अस्य काव्यस्य केरलेषु काव्यान्तरापेक्षया सुप्रचारः अस्ति। ओजःप्रसादसमतामाधुर्यादिगुणाः अस्मिन् काव्ये सामञ्जस्येन समन्विताः सन्ति। काव्यस्यास्य प्रथमसर्गादुद्धृताः सुमेरुपर्वतवर्णनपराः दश श्लोकाः पाठभागे सन्निवेशिताः।

**सुमेरुपर्वतं वर्णयति।**

1. **अस्ति श्रियः सद्म सुमेरुनामा**
**समस्तकल्याणनिधिर्गिरीन्द्रः।**
**तिष्ठन्निदं विश्वमनुप्रविश्य**
**स्वेनात्मना विष्णुरिवोर्जितेन।। १ ।।**



**पदच्छेदः** - समस्तकल्याणनिधिर्गिरीन्द्रः - समस्तकल्याणनिधिः + गिरीन्द्रः।

तिष्ठन्निदम् - तिष्ठन् + इदम्।

विष्णुरिवोर्जितेन - विष्णुः + इव + ऊर्जितेन।

| ***अन्वयः*** | ***अर्थः*** |
|---|---|
| श्रियः सद्म | लक्ष्मीदेव्याः वासस्थानम् |
| समस्तकल्याणनिधिः | सर्वेषाम् ऐश्वर्याणाम् आकरः |
| ऊर्जितेन स्वेन आत्मना | बृहता स्वकीयेन शरीरेण(प्रकाशमयेन) |
| इदं विश्वम् अनुप्रविश्य | सर्वम् इमं प्रपञ्चं व्याप्य |
| तिष्ठन् विष्णुः इव स्थितः | वर्तमानः महाविष्णुः इव शोभमानः |
| सुमेरुनामा गिरीन्द्रः अस्ति | सः सुमेरुनामा पर्वतराजः भवति। |

**सारः** - विष्णुः ऊर्जितेन (तेजोमयेन) स्वेन आत्मना स्वकीयेन स्वरूपेण विश्वमनुप्रविश्य प्रपञ्चमनुप्रविश्य प्रपञ्चं व्याप्य तिष्ठति । तथा अयं सुमेरुपर्वतोऽपि ऊर्जितेन आत्मना महता शरीरेण सर्वं व्याप्य तिष्ठति । एतादृशः सुमेरुः समस्तकल्याणनिधिः अस्ति ।

**विग्रहः** - गिरीन्द्रः - गिरिषु इन्द्रः।

विष्णुः - वेवेष्टि इति विष्णुः व्यापनशीलः।

समस्तकल्याणनिधिः - समस्तानां कल्याणानां निधिः।

**क्रियापदम्** - अस्ति - अस भुवि पर. लट्. प्र. पु. ए. व.।

अस्ति स्तः सन्ति।

**पर्यायपदानि** - पर्वतः - 'महीध्रः शिखरी क्ष्माभृदहार्यधरपर्वताः' इत्यमरः।

**सुमेरोः पार्श्वेषु सूर्यः चन्द्रः च क्रीडतः।**

2. **मिथस्तिरोभावविलोकनाभ्यां**

**संक्रीडमानाविव बालकौ द्वौ।**

**पार्श्वेषु यस्याशु परिभ्रमन्तौ**

**चन्द्रांशुमन्तौ नयतो दिनानि।। २ ।।**



**पदच्छेदः -**

| | | |
|---|---|---|
| मिथस्तिरोभावविलोकनाभ्याम् | - | मिथः + तिरोभावविलोकनाभ्याम्। |
| संक्रीडमानाविव | - | संक्रीडमानौ + इव। |
| यस्याशु | - | यस्य + आशु। |

| ***अन्वयः*** | ***अर्थः*** |
|---|---|
| चन्द्रांशुमन्तौ | चन्द्रः च सूर्यः च |
| यस्य पार्श्वेषु | यस्य सुमेरोः सानुदेशेषु |
| मिथः तिरोभावविलोकनाभ्यां | परस्परम् निलीनावगमनाभ्यां |
| संक्रीडमानौ द्वौ बालकौ इव | केलीव्यापृतौ द्वौ बालकौ इव |
| आशु परिभ्रमन्तौ | शीघ्रं परिक्रममाणौ |
| दिनानि नयतः | दिवसान् नयतः। |

**सारः** - सुमेरुपर्वतस्य सानुदेशेषु सञ्चरन्तौ सूर्यः चन्द्रः च परस्परं तिरोभावविलोकनाभ्यां केलीव्यापृतौ द्वौ बालकौ इव उदयास्तमनाभ्यां दिनानि च नयतः।

**विग्रहः** - चन्द्रांशुमन्तौ - अंशवः अस्य सन्ति इति अंशुमान्, चन्द्रश्च अंशुमान् च चन्द्रांशुमन्तौ।

**व्याकरणम्** - संक्रीडमानौ - संपूर्वक क्रीड् धातोः आत्मनेपदं, ततः शानच् ।

**क्रियापदम्** - नयतः - 'णीञ् प्रापणे' पर. लट्. प्र. पु. द्वि. व.।

नयति नयतः नयन्ति।

**पर्यायपदानि** - चन्द्रः - 'हिमांशुश्चन्द्रमाश्चन्द्रः इन्दुः कुमुदबान्धवः' इत्यमरः।

**अयं सुमेरुपर्वतः लोकत्रयस्य दीप इव शोभते।**

3. **उच्चैश्शिखः काञ्चनगौरवर्णः**
**तमोनिगृह्णन्महसा निजेन।**
**दीपस्त्रयाणामिव विष्टपानां**
**यो भाति पर्यन्तचरत्पतङ्गः।। ३ ।।**

**पदच्छेदः** - दीपस्त्रयाणामिव - दीपः + त्रयाणाम् + इव।
यो भाति - यः + भाति।

| ***अन्वयः*** | ***अर्थः*** |
|---|---|
| उच्चैश्शिखः | उन्नतशृङ्गः |
| काञ्चनगौरवर्णः | स्वर्णसमानवर्णः |
| पर्यन्तचरन्पतङ्गः | पर्यन्ते संचरन् दीपकीटः (सुमेरोः पार्श्वेषु सूर्यः सञ्चरति) |
| यः निजेन महसा | यः सुमेरुपर्वतः आत्मनः तेजसा प्रकाशेन |
| तमोनिगृह्णन् | तमसः विनाशं कुर्वन् |
| त्रयाणां विष्टपानां | त्रयाणां लोकानां |
| दीपः इव भाति | प्रकाशस्य स्रोतः (प्रदीपः)इव शोभते। |
| (यः सुमेरुपर्वतः भवति) | |

**सारः** - यथा दीपः ऊर्ध्वजालः सुवर्णकान्तियुक्तः समन्तात् सञ्चरद्भिः पतङ्गैः अग्निकीटैः सहितः सन् अन्धकारं नाशयति, तथा अयम् उन्नतशृङ्गः स्वर्णसमानवर्णः पर्यन्ते चरता सूर्येण सहितः सर्वेषां तमः नाशयति। लोकं प्रकाशपूर्णं करोति इत्यर्थः।

**विग्रहः** - उच्चैश्शिखः - उच्चैः (उन्नता) शिखाः यस्य सः।

काञ्चनगौरवर्णः - काञ्चनस्य इव गौरः वर्णः यस्य सः काञ्चनगौरवर्णः।

पर्यन्तचरत्पतङ्गः -पर्यन्ते चरन् पतङ्गः यस्य सः (पर्वतपक्षे) दीपपर्यन्तं चरन्तः पतङ्गा यस्य सः। (दीपपक्षे)

**क्रियापदं** - भाति - भा दीप्तौ पर. लट्. प्र. पु. ए. व.।

**सुमेरुः पुत्रीमिव वसुधां लालयति।**

4. **यस्याः पतित्वे विहिताभिलाषः**
**करोति तीव्राणि तपांसि लोकः।**
**बिभर्ति रत्नाकरमेखलां तां**
**अङ्केन पुत्रीमिव यो धरित्रीम्।। ४ ।।**

**पदच्छेदः** - यो धरित्रीम् - यः + धरित्रीम्।

| ***अन्वयः*** | ***अर्थः*** |
|---|---|
| लोकः | जनाः |
| यस्याः | यस्याः भूम्याः |
| पतित्वे | भर्तृपदप्राप्तौ (आधिपत्यै) |
| विहिताभिलाषः (सन्) | कृताभिलाषाः (सन्तः) |
| तीव्राणि | कठिनानि |
| तपांसि करोति | तपोऽनुष्ठानानि कुर्वन्ति (तपांसि अनुतिष्ठन्ति) |
| तां रत्नाकरमेखलाम् | तां सागरमेखलाम् |
| धरित्रीम् | भूमीम् |
| यः | सुमेरुपर्वतः |
| अङ्केन | क्रोडेन (उत्सङ्गेन) |
| पुत्रीमिव | सुतामिव |
| बिभर्ति | धरति |
| (सः सुमेरुपर्वतः अस्ति) | सः सुमेरुपर्वतः अस्ति। |

**सारः** - लोके जनाः भूमीदेव्याः आधिपत्यं लब्धुं तीव्राभिलाषाः भूत्वा तीव्राणि तपांसि कुर्वन्ति। किन्तु सः सुमेरुपर्वतः तादृशीं सागरमेखलां भूमिं पितृवात्सल्येन पुत्रीमिव स्वाङ्के धरति।

**विग्रहः** - विहिताभिलाषः - विहितः अभिलाषः येन सः ।

रत्नाकरमेखला-रत्नानाम् आकरः रत्नाकरः, रत्नाकर एव मेखला यस्याः सा ताम्।



**क्रियापदानि**

**करोति** - 'डुकृञ् करणे' पर. लट्. प्र. पु. ए. व.।

करोति कुरुतः कुर्वन्ति।

**बिभर्ति** - भृञ् भरणे (जुहोत्यादि)परस्मैपदि लट्

बिभर्त्ति-बिभृतः-बिभ्रति

**पर्यायपदानि** - पतिः -'धवः प्रियः पतिर्भर्ता' इत्यमरः।

**जनाः सुमेरुपर्वते वस्तुमभिलषन्ति।**

5. **महान्ति दानानि मखानुदग्रान्**
**पराञ्चि पानाशनयोस्तपांसि।**
**शरीरिणश्शान्तमलैर्मनोभिः**
**कुर्वन्ति यच्छृंगनिवासकामाः।। ५ ।।**

**पदच्छेदः** - पानाशनयोस्तपांसि - पानाशनयोः + तपांसि।

शरीरिणश्शान्तमलैर्मनोभिः - शरीरिणः + शान्तमलैः + मनोभिः।

| *अन्वयः* | *अर्थः* |
| --- | --- |
| यच्छृङ्गनिवासकामाः | यस्य पर्वताग्रेषु वस्तुमभिलषन्तः (स्वर्गकामाः) |
| शरीरिणः | देहिनः |
| शान्तमलैः | निर्मलैः |
| मनोभिः | चित्तैः |
| महान्ति | श्रेष्ठानि |
| दानानि | दानकर्माणि |
| उदग्रान् | तीव्रान् |
| मखान् | यागान् |
| पानाशनयोः | पाने भक्षणे च |
| पराञ्चि | विमुखानि |
| तपांसि | तपोऽनुष्ठानानि |
| कुर्वन्ति। | आचरन्ति। |

**सारः** - जनाः सुमेरोः उन्नतशृङ्गेषु वस्तुमभिलषन्ति। ते स्वर्गवासमभिलषन्ति । ते निर्मलचित्ताः भूत्वा श्रेष्ठानि दानानि कुर्वन्ति। कठिनं यागं कुर्वन्ति। पाने भक्षणे च विमुखाः भूत्वा तपांसि आचरन्ति। (जनाः एतैः कर्मभिः देवत्वं प्राप्तुम् अभिलषन्ति इत्यर्थः।)

**विग्रहः**

पानाशनयोः - पानं च अशनं च पानाशने तयोः।

शान्तमलैः - शान्तः मलः येषां तानि शान्तमलानि, तैः।

यच्छृंगनिवासकामाः - यस्य शृङ्गं यच्छृङ्गं, तत्र निवासः यच्छृङ्गनिवासः, तस्मिन् कामाः येषां ते।

**पदपरिचयः**

पराञ्चि - ककारान्तः नपु-प्र-ब-व (परा  पराची पराञ्चि)।

**देवाः प्रियाभिः सार्धम् अत्युन्नतान् समुद्रतरङ्गान् अवलोकयन्ति।**

6. **सुरा युगान्तेषु सह प्रियाभिः**
**निषेदिवांसो यदधित्यकासु।**
**उदन्वतामैक्यमुपागतानां**
**पश्यन्ति कल्लोलशतप्रचारान्।। ६ ।।**

**पदच्छेदः**

सुरा युगान्तेषु - सुराः + युगान्तेषु।

निषेदिवांसो यदधित्यकासु - निषेदिवांसः + यदधित्यकासु।



| ***अन्वयः*** | ***अर्थः*** |
|---|---|
| सुराः | देवाः |
| युगान्तेषु | प्रलयकालेषु |
| प्रियाभिः सह | पत्नीभिः समम् |
| यदधित्यकासु | यस्य (सुमेरोः) ऊर्ध्वप्रदेशेषु |
| निषेदिवांसः | निषण्णाः |
| ऐक्यम् | एकताम् |

| | |
|---|---|
| उपागतानाम् | प्राप्तानाम् |
| उदन्वताम् | समुद्राणाम् |
| कल्लोलशतप्रचारान् | तरङ्गशतानाम् आगमनादीन् |
| पश्यन्ति। | अवलोकयन्ति। |

**सारः** - देवाः कान्ताभिः सह सुमेरुपर्वतस्य उन्नतदेशेषु वसन्ति। प्रलयकालेषु समुद्राः एकतां प्राप्य अत्युन्नतैः तरङ्गैः सुमेरुपर्वतं प्राप्नुवन्तः। देवाः प्रियाभिः साकं समुद्राणां तरङ्गान् पश्यन्ति।

अद्रेः आसन्ना भूमिः उपत्यका। अद्रेः ऊर्ध्वभूमिः अधित्यका।

**निषेदिवांसः** - नि उपसर्गपूर्वक सद्(षद्लृ विशरणगत्यवसादनेषु) धातोः क्वसु प्रत्ययान्तः।

(निषेदिवान् - निषेदिवांसौ - निषेदिवांसः)

**क्रियापदानि** - पश्यन्ति - दृशिर् प्रेक्षणे पर. लट्. प्र. पु. ब. व.।

पश्यति पश्यतः पश्यन्ति।

**पर्यायपदानि** - समुद्रः - 'उदन्वानुदधिः सिन्धुः सरस्वान् सागरोऽर्णवः' इत्यमरः।

**वर्णानां प्रभेदं ज्ञातुं न शक्यते (सुवर्णरजतश्वेतवर्णानां मिश्रणं वर्णयति।)**

7. **स्वर्गौकसः स्वर्णमहीषु पीताः**
**श्वेतत्विषो रूप्यमयीषु भूषु।**
**नीलाश्च नीलोपलमेदिनीषु**
**ज्ञातुं मिथो यत्र न शक्नुवन्ति।। ८ ।।**

**पदच्छेदः** - नीलाश्च - नीलाः + च।

मिथो यत्र - मिथः + यत्र।

श्वेतत्विषो रूप्यमयीषु - श्वेतत्विषः + रूप्यमयीषु।

| *अन्वयः* | *अर्थः* |
|---|---|
| यत्र | सुमेरुपर्वते |
| स्वर्गौकसः | स्वर्गवासिनः (देवाः) |
| स्वर्णमहीषु | सुवर्णभूमिषु |
| पीताः | पीतवर्णाः |
| रूप्यमयीषु भूषु | रजतमयीषु भूमिषु |
| श्वेतत्विषः | श्वेतवर्णाः, (धवलवर्णाः) |
| नीलोपलमेदिनीषु | इन्द्रनीलरत्नपूर्णेषु भूमिषु |
| नीलाः च | नीलवर्णाः च |
| मिथः | अन्योन्यम् |
| ज्ञातुं | अवगन्तुम् |
| न शक्नुवन्ति। | न प्रभवन्ति। |

**सारः** - सुमेरुपर्वते स्वर्गवासिनः देवाः सर्वे सुवर्णमयीषु प्रदेशेषु पीतवर्णाः, रजतमयीषु प्रदेशेषु धवलवर्णाः, इन्द्रनीलरत्नपूर्णेषु प्रदेशेषु नीलवर्णाः च सन्तः विविच्य ज्ञातुं न प्रभवन्ति।

**विग्रहः** - स्वर्गौकसः - स्वर्गः ओकः येषां ते ।

श्वेतत्विषः - श्वेता त्विट् येषां ते ।

रूप्यमयीषु - रूप्यस्य विकारः रूप्यमयी, तेषु ।

नीलोपलमेदिनीषु - नीलोपलमय्यः मेदिन्यः, तासु।

**क्रियापदानि** - शक्नुवन्ति - 'शक्लृ शक्तौ' पर. लट्. प्र. पु. ब. व.।

शक्नोति शक्नुवतः शक्नुवन्ति।

**पर्यायपदानि** - देवाः - 'अमरा निर्जरा देवा त्रिदशा विबुधाः सुराः।
सुपर्वाणः सुमनस्त्रिदिवेशा दिवौकसः' इत्यमरः।

**अरुणागमनेन देवस्त्रीणां प्रणयकलहत्यागं सूचयति।**

8. **दरीगृहोत्सङ्गगतेरनूरोः**
**कशाभिघातध्वनिभिः सकम्पाः।**
**सद्यः प्रियानुज्झितमानदोषाः**
**सुराङ्गना यत्र परिष्वजन्ते।। ९ ।।**



**पदच्छेदः** - सुराङ्गना यत्र - सुराङ्गनाः + यत्र

| ***अन्वयः*** | ***अर्थः*** |
|---|---|
| यत्र | यस्मिन् पर्वते |
| सुराङ्गनाः | देवस्त्रियः |
| दरीगृहोत्सङ्गगतेः | गुहागृहाणां समीपमागतस्य |
| अनूरोः | सूर्यसारथेः अरुणस्य |
| कशाभिघातध्वनिभिः | तोत्रस्य ताडनशब्दैः |
| सकम्पाः | भयाकुलाः |
| सद्यः | शीघ्रम् |
| उज्झितमानदोषाः | त्यक्तप्रणयकलहाः |
| प्रियान् | कान्तान् |
| परिष्वजन्ते | आलिङ्गन्ति। |

**सारः** - पर्वतपार्श्वेषु आगतस्य सूर्यसारथेः अरुणस्य कशाभिघातशब्दैः भीताः सुराङ्गनाः प्रणयकलहं परित्यज्य शीघ्रमेव प्रियजनान् आलिङ्गन्ति।

**विग्रहः** - दरीगृहोत्सङ्गगतेः - दरीगृहस्य उत्सङ्गेन गतिः यस्य सः दरीगृहोत्सङ्गगतिः तस्य।

अनुरूः - अविद्यमानौ ऊरू यस्य सः।

उज्झितमानदोषाः - उज्झितः मानदोषः याभिः ताः।

सकम्पाः - कम्पेन सह वर्तन्ते इति।

कशाभिघातध्वनिभिः - कशायाः अभिघातः कशाभिघातः अस्य ध्वनिः कशाभिघातध्वनिः तैः।

**क्रिया -** परिष्वजन्ते - परि + ष्वञ्ज - परिष्वङ्गे आत्म.लट् प्र. पु. ब. व.।

**पर्यायपदानि** - दरी - 'दरी तु कन्दरो वा स्त्री देवखातबिले गुहा' इत्यमरः।

**उद्यानेभ्यः देवसुन्दर्यः पुष्पाणि सम्पादयन्ति।**



9. **यत्रोद्यतानां कुसुमापचाये**

**कान्तासु कल्पद्रुमवाटिकासु।**

**विभान्ति सुत्रामविलासिनीनां**

**पदानि लाक्षारसपाटलानि।। १० ।।**

**पदच्छेदः** - यत्रोद्यतानाम् - यत्र + उद्यतानाम्।

| ***अन्वयः*** | ***अर्थः*** |
|---|---|
| यत्र | सुमेरुपर्वते |
| कान्तासु | कमनीयेषु |
| कल्पद्रुमवाटिकासु | कल्पवृक्षोद्यानेषु |
| कुसुमापचाये | कुसुमानां संग्रहणे |
| उद्यतानाम् | उद्युक्तानाम् |
| सुत्रामविलासिनीनाम् | देवस्त्रीणाम् |

| | |
|---|---|
| लाक्षारसपाटलानि | लाक्षारसेन पाटलानि |
| पदानि | पदविन्यासचिह्नानि |
| विभान्ति | शोभन्ते। |

**सारः** - सुमेरुपर्वते कमनीयेषु कल्पवृक्षोद्यानेषु कुसुमसंग्रहणे व्यापृतानां सुरसुन्दरीणां पदानि लाक्षारसेन अरुणवर्णानि जातानि। तादृशानां पदविन्यासचिह्नानि शोभन्ते।

**विग्रहः** - सुत्रामविलासिनीनाम् - सुत्राम्णः विलासिन्यः तासाम्।

लाक्षारसपाटलानि-लाक्षायाः रसः तेन पाटलानि।

**क्रियापदम्** विभाति - वि + भा दीप्तौ पर. लट्. प्र. पु. ब. व.।

विभाति विभातः विभान्ति।

**पर्यायपदानि** - कान्ता - 'प्रमदा मानिनी कान्ता ललना च नितम्बिनी' इत्यमरः।

**सुमेरोः विष्णुसादृश्यं वर्णयति**

10. **श्रियाभिरामः शरणं सुराणा-**
**मलङ्घनीयो महता महिम्ना।**
**विराजमानो वनमालया च**
**यच्छाङ्र्गधन्वानमनुप्रयाति।।**

**पदच्छेदः** -

| | | |
|---|---|---|
| श्रियाभिरामः | - | श्रिया + अभिरामः। |
| अलङ्घनीयो महता | - | अलङ्घनीयः + महता। |
| विराजमानो वनमालया | - | विराजमानः + वनमालया। |
| यच्छाङ्र्गधन्वानम् | - | यः + शाङ्र्गधन्वानम् |

| *अन्वयः* | *अर्थः* |
|---|---|
| श्रिया | शोभया (मेरुपक्षे), लक्ष्मीदेव्या (विष्णुपक्षे) |
| अभिरामः | मनोहरः  मनोज्ञः |
| सुराणां | देवानाम् |
| शरणं | आश्रयम्, रक्षिता |
| महता | श्रेष्ठेन, उत्कर्षेण |
| महिम्ना | माहात्म्येन / महत्वेन |
| अलङ्घनीयः | लङ्घयितुम् अशक्यः / जेतुम् अशक्यः |
| वनमालया | काननसमूहेन / वनमालामाल्येन |
| विराजमानः | शोभमानः/ विशोभमानः |
| यः | सुमेरुः |
| शाङ्र्गधन्वानम् | महाविष्णुम् |
| अनुप्रयाति। | अनुकरोति। |

**सारः** - यथा लक्ष्मीपतिः महाविष्णुः वनमालया शोभते तथा अयं पर्वतः अति शोभया मनोहरः देवानाम् आश्रयः श्रेष्ठेन माहात्म्येन जेतुम् अशक्यः काननसमूहेन शोभमानः। अतः अयं लक्ष्मीसमेतः विष्णुः इव आभाति।

**विग्रहः** - शाङ्र्गधन्वानम् - शाङ्र्गं धनुः यस्य सः शाङ्र्गधन्वा, तम्। (धनुषश्च इति सूत्रेण अनङ् आदेशे धन्वन् इति रूपम्)

अलङ्घनीयः - लङ्घयितुं शक्यः लङ्घनीयः, न लङ्घनीयः।

**क्रियापदानि** - अनुप्रयाति - अनु प्र या प्रापणे लट् प्रथमपुरुष एकवचनम्।

## पठनप्रवर्तनानि।

❖ श्लोकान् तालालयानुसारम् आलपतु।

**श्रद्धेयाः अंशाः।**

- स्पष्टतया पारायणम्।
- आशयावबोधः।
- पदविच्छेदनम्।
- तालानुसारं पारायणम्।

❖ काव्यं पठित्वा अन्वयं लिखतु।

**श्रद्धेयाः अंशाः।**

- आशयावबोधः।
- नूतनपदानाम् अर्थग्रहणम्।
- कर्तृक्रियासम्बन्धग्रहणम्।

❖ काव्यभागं पठित्वा सुमेरुपर्वतं वर्णयतु।

**श्रद्धेयाः अंशाः।**

- आशयव्यक्तता।
- आशयपूर्णता।
- वाक्यघटना।

❖ पाठभागे भवताम् इष्टतमः श्लोकः कः? कारणं किम्? लिखतु।

**श्रद्धेयाः अंशाः।**

- आशयस्पष्टता।
- सान्दर्भिकाशयेन साकम् अन्तर्गताशयग्रहणम्।
- मानसिकविकासः। आस्वादनाशक्तिवर्धनम्।

## शब्दकोशः

| पदम् | संस्कृतम् | कैरली | कन्नटम् | आङ्गलम् |
|---|---|---|---|---|
| सद्म | गृहं | വീട് | ಮನೆ | house |
| अंशुमान् | सूर्यः | സൂര്യൻ | ಸೂರ್ಯ | sun |
| काञ्चनम् | सुवर्णं | സ്വർണ്ണം | ಚಿ□ | gold |
| शिखरः | शृङ्गः | കൊടുമുടി | ಶಿಖರ | peak |
| विष्टपः | लोकः | ലോകം | ಪ್ರಪಂಚ | world |
| बिभर्ति | धरति | ധരിക്കുന്നു | ಧರಿಸುತ್ತಾನೆ/ಳೆ | wears |
| धरित्री | भूमिः | ഭൂമി | ಭೂಮಿ | earth |
| मखः | यागः | യാഗം | ಯಾಗ | (yajna) sacrifice |
| पादपः | तरुः | വൃക്ഷം | ಮರ | tree |
| गह्वरः | गुहा | ഗുഹ | ಗುಹೆ | cave |
| नीलोपलः | इन्द्रनीलः | ഇന്ദ്രനീലം | ಇಂದ್ರನೀಲಮಣಿ | ruby |
| कशा | ताडनीरज्जुः(तोत्रः) | ചാട്ട | ಚಾಟಿ | whip |
| लाक्षा | राक्षा | കോലരക്ക് | ಅರಗು | lac |

## अनुबन्धः

### धातुपरिचयः

**परि + ष्वञ्ज् परिष्वङ्गे आत्मनेपदी लट्।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. पु. | परिष्वजते | परिष्वजेते | परिष्वजन्ते |
| म. पु. | परिष्वजसे | परिष्वजेथे | परिष्वजध्वे |
| उ. पु. | परिष्वजे | परिष्वजावहे | परिष्वजामहे। |



### आकारान्तः स्त्रीलिङ्गः 'कशा' शब्दः।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. | कशा | कशे | कशाः |
| सं. प्र. | हे कशे | हे कशे | हे कशाः |
| द्वि. | कशां | कशे | कशाः |
| तृ. | कशया | कशाभ्यां | कशाभिः |
| च. | कशायै | कशाभ्यां | कशाभ्यः |
| प. | कशायाः | कशाभ्यां | कशाभ्यः |
| ष. | कशायाः | कशयोः | कशानां |
| स. | कशायां | कशयोः | कशासु। |

एवं माला, लता, जाया प्रभृतयः।

## किमधिगतम् ?

❖ **पठनप्रवर्तनानि यथाकालं कृतानि चेत् साधुतासूचकचिह्नं (✓) करोतु।**

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेशनिर्देशः | परिहारबोधनम् संख्यया सूच्यताम्* |
|---|---|---|---|---|---|
| 1. | तालयानुसारं श्लोकाः आलपिताः। | | | | |
| 2. | अन्वयः लिखितः। | | | | |
| 3. | सुमेरुपर्वतवर्णना कृता। | | | | |
| 4. | आस्वादनटीका लिखिता। | | | | |

*

*(१) अध्यापकस्य साहाय्येन (२)सुहृदः साहाय्येन (३) अन्येषां साहाय्येन*